पारायणोपनिषत्

अथाह वै वेदानां वेदत्वमेतेन शाक्ते शक्तित्वमेति न वेदमातुर्वेद-मातृत्वमेतेन तत्सवितुर्वरेण्यं भर्गो देवस्य धीमहि। धियो यो नः प्रचोदयात्। परोरजसे सावदोम्। महाकालाय विद्महे श्मशानवासिने धीमहि। तन्नो रुद्रः प्रचोदयात्। रुद्र एवाग्निरिति। अथ प्रकाशः ॐ भूर्भुवः स्वः ॐ ऐं क्लीं सौः। ॐ तत्सवितुर्वरेण्यं भर्गो देवस्य धीमहि। धियो यो नः प्रचोदयात्। परोरजसे सावदोम्। सौः क्लीं ऐं ह्रौं क्रीं क्रीं क्रीं ह्रूं ह्रूं ह्रीं ह्रीं दक्षिणकालिके क्रीं क्रीं क्रीं ह्रूं ह्रूं ह्रीं ह्रीं स्वाहा। ह्रां ऐं क्लीं श्रीं ॐ ॐ ॐ श्रीं क्लीं ऐं। महाकालाय विद्महे श्मशानवासिने धीमहि। तन्नो रुद्रः प्रचोदयात्। रुद्र एवाग्निरिति संघट्टनाधीशो

भवेत् । तदिदंपारायणवशादानन्दपूर्णो भवेत् । ओघत्रयनामविशिष्टमाकृति-विशिष्टं नवनाथनामविशिष्टं वा नाममयीमाज्ञां दद्यात् । घटिकापारायणं चरेत् । दिनाक्षरयुगाक्षरे तद्दिननित्याहंसस्तदनु मातृकां जपेत् । कालनित्यां जपेत् । द्विशतसाहस्रशीर्षं तरसाभिजापी भवेत् । मन्त्रपारायणी भवेत् । नामपारायणी भवेत् । चक्रपारायणी भवेत् । स सर्वं पश्यति । स सर्वं जलमयो भवेत् । वह्नौ वह्निमयो भवेत् । चराचरगतिर्भवेत् । पराशतषष्टिवाणीज्ञो भवेत् । षोढान्यासाधिकारी भवेत् । मासतः पक्षतो वारतः पारायणी भवेत् । सर्वाधिकारी भवेत् । दृष्टाकं चरेत् । तदाचरणी अमृतत्वं गच्छति । ब्रह्मत्वं गच्छति । साक्षात्सप्तमीरूपो भवेदिति प्रोतं वेद ॥

इत्यथर्ववेदीये सौभाग्यकाण्डे पारायणोपनिषत् समाप्ता
